गृहमणिः, पुं, (गृहे मणिरिव ।) प्रदीपः । इति हेमचन्द्रः । ३ । ३५१ ॥

गृहमाचिका, स्त्री, (गृहे मचते शठति गुप्तभावेन तिष्ठतीति । मच् + "ण्वुल् तृचौ" ।३।१।१३३ । इति ण्वुल् । ततष्टाप् । कापि अत इत्वञ्च ।) चर्म्मचटी । इति त्रिकाण्डशेषः ॥ चामचिका इति भाषा ॥

गृहमृगः, पुं, (गृहे मृग इव । यद्वा, गृहस्थितो मृगः पशुः ।) कुक्कुरः । इति हेमचन्द्रः ।४।३४५॥

गृहमेधी, [न्] पुं, (गृहैर्दारैर्मेधते सङ्गच्छते इति । गृह + मेधृ सङ्गमे + "सुप्यजाताविति ।" ३ । २ । ७८ । इति णिनिः ।) गृहस्थः । इति हेमचन्द्रः । ३ । ४७२ ॥ (यथा, मनुः । ४ । ३१ ।
"वेदविद्याव्रतस्नातान् श्रोत्रियान् गृहमेधिनः ।
पूजयेद्धव्यकव्येन विपरीतांश्च वर्ज्जयेत् ॥")

गृहमेधिनी, स्त्री, (गृहं मेधते पुनाति शास्त्रोक्तदानदयादाक्षिण्यादिना सङ्गच्छते इत्यर्थः। गृह + मेध + णिनिः । ततो ङीप् ।) सात्त्विकी बुद्धिः । इति महाभारतम् ॥ (गृहमेधिन् + स्त्रियां ङीप् ।) गृहस्थपत्नी च ॥

गृहयाय्यः, पुं, (गृह ग्रहणे । गृहयते इति । गृह + "श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।" उणां । ३ । ९६ । इति आय्यः । ततः "अयामन्तेति ।" ६।४। ५५ । इति णेरयादेशः ।) गृहस्थः । इत्युणादिकोषः ॥

गृहयालुः, पुं, (गृहयते गृह्णातीति । गृह + "स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् ।" ३ । २ । १५८ । इति आलुच् । "अयामन्तेति ।" ६ । ४ । ५५ । इति णेरयादेशः ।) गृहीता । गृहणशीलः । इत्यमरः । ३ । १ । २७ ॥

गृहवाटिका, स्त्री, (गृहसमीपस्था वाटिका आरामः ।) गृहसमीपवनम् । इति हारावली । १६८ ॥

गृहस्थः, पुं, ("न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते ।" अतएव गृहेषु दारेषु तिष्ठति अभिरमते इति । गृह + स्था + "सुपि स्थः ।"३।२।४। इति कः ।) गृही । द्वितीयाश्रमी । तत्पर्य्यायः । ज्येष्ठाश्रमी २ गृहमेधी ३ स्नातकः ४ गृही ५ । इति हेमचन्द्रः । ३ । ४७१ ॥ गृहपतिः ६ सत्री ७ । इत्यमरः । २ । ८ । १५ ॥ गृहयाय्यः ८ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ गृहाधिपः ९ । इति हलायुधः ॥ कुटुम्बी १० । इति जटाधरः ॥ गृहायनिकः ११ । इति शब्दरत्नावली ॥ * ॥ तस्य धर्म्मो यथा,—
"गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥
यः कश्चिदिह लोकेऽस्मिन्नागमः संप्रकीर्त्तितः ।
तस्यान्त गमनं श्रेयः कीर्त्तिरेषा सनातनी ॥
संस्कारैः संस्कृतः पूर्व्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्त्तेत वेदवित् ॥
स्वदारनिरतो नित्यं शिष्टाचारी जितेन्द्रियः ।
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेदिह ॥
देवतातिथिशिष्टाशी निरतो वेदकर्म्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथाविधि ॥
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वागङ्गचपल इति शिष्टस्य गोचरः ॥
नित्यं यज्ञोपवीती स्यात् शुक्लवासाः शुचिव्रतः ।
नियतो दमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥
जितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः ।
वैणवीं धारयेद्यष्टिं सोदकञ्च कमण्डलुम् ॥
अधीत्याध्यापनं कुर्य्यात् तथा यजनयाजने ।
दानं प्रतिग्रहञ्चापि षड्गुणां वृत्तिमाचरेत् ॥
त्रीणि कर्म्माणि यानीह ब्राह्मणानान्तु जीविका ।
याजनाध्यापने चोभे शुद्धाच्चापि प्रतिग्रहः ॥
अथ शेषाणि चान्यानि त्रीणि कर्म्माणि यानि तु ।
दानमध्ययनं यज्ञो धर्म्मयुक्तानि तानि तु ॥
तेष्वप्रमादं कुर्व्वीत त्रिषु कर्म्मसु धर्म्मवित् ।
दान्तो मैत्रः क्षमायुक्तः सर्व्वभूतसमो मुनिः ॥
सर्व्वमेतद् यथाशक्ति विप्रो निर्व्वर्त्तयन् शुचिः ।
एवं युक्तो जयेत् स्वर्गं गृहस्थः संशितव्रतः ॥"
इत्याश्वमेधिकपर्व्व ॥
"सर्व्वेषामाश्रमाणान्तु द्वैविध्यन्तु चतुर्व्विधम् ।
ब्रह्मचार्य्युपकुर्व्वाणो नैष्ठिको ब्रह्मतत्परः ॥
योऽधीत्य विधिवद्वेदान् गृहस्थाश्रममाव्रजेत् ।
उपकुर्व्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ॥
अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्च्चनम् ।
गृहस्थस्य समासेन धर्म्मोऽयं द्विजसत्तमाः ॥
उदासीनः साधकश्च गृहस्थो द्विविधो भवेत् ।
कुटुम्बभरणे युक्तः साधकोऽसौ गृही भवेत् ॥
ऋणानि त्रीण्यपाकृत्य त्यक्त्वा भार्य्याधनादिकम् ।
एकाकी विचरेद् यस्तु उदासीनः स मौक्षिकः ॥"
इति गारुडे ४९ अध्यायः ॥
बाहुल्यन्तु तत्रैव ।५०।५१। अध्याययोर्द्रष्टव्यम् ॥*॥ गृहस्थब्राह्मणधर्म्मो यथा,—
"चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः ।
द्वितीयमायुषो भागं कृतदारो गृहे वसेत् ॥
अद्रोहेणैव भूतानामल्पद्रोहेण वा पुनः ।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि ॥
यात्रामात्रप्रसिद्ध्यर्थं स्वैः कर्म्मभिरगर्हितैः ।
अक्लेशेन शरीरस्य कुर्व्वीत धनसञ्चयम् ॥
ऋतामृताभ्याञ्जीवेत्तु मृतेन प्रमृतेन वा ।
सत्यानृताभ्यामपि वा न श्ववृत्त्या कदाचन ॥
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ।
मृतन्तु याचितं भैक्षं प्रमृतं कर्षणं स्मृतम् ॥
सत्यानृतन्तु वाणिज्यं तेन चैवापि जीव्यते ।
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्ज्जयेत् ॥"
इत्यादि मानवे ४ अध्यायः ॥

गृहस्थूणं, क्ली, (गृहस्य गृहावलम्बनार्था स्थूणा । अभिधानात् क्लीवत्वम् ।) गृहस्तम्भः । इत्यमरः । ३ । ५ । ३० ॥

गृहाः, पुं, (गृह्णन्ति धान्यादिकं इति । ग्रह + "गेहे कः ।" ३।१।१४४ । इति कः ।) गृहम् । (यथा, मनुः । ४ । २५० ।
"शय्यां गृहान् कुशान् गन्धानपः पुष्पं मणीन् दधि ।
धाना मत्स्यान् पयो मांसं शाकञ्चैव न निर्णुदेत् ॥"
गृह्णन्ते धर्म्माचरणाय इति । ग्रह + कः ।) दाराः । इत्यमरः । २ । ६ । ५ ॥ नित्यबहुवचनान्तोऽयं शब्दः ॥

गृहागतः, पुं, (गृहमागतः । आ + गम् + कर्त्तरि क्तः ।) अतिथिः । इत्यमरः । २ । ७ । ३४ ॥ (गृहमागते, त्रि । यथा, हितोपदेशे ।
"नाहं गृहागतं हन्मि ।")

गृहाधिपः, पुं, (गृहस्य अधिपः ।) गृहस्थः । इति हलायुधः ॥

गृहाम्लं, क्ली, (गृहे पर्य्युषितान्नादिना प्रस्तुतीकृतमम्लम् ।) काञ्जिकम् । इति त्रिकाण्डशेषः ॥

गृहायनिकः, पुं, (गृहरूपमयनं विद्यतेऽस्य इति ठन् ।) गृहस्थः । इति शब्दरत्नावली ॥

गृहारामः, पुं, (गृहस्य गृहे गृहसमीपस्थो वा आरामः ।) गृहसमीपे कृत्रिमवनम् । तत्पर्य्यायः । निष्कुटः २ । इत्यमरः । २ । ४ । १ ॥

गृहालिका, स्त्री, (गृहे आलिरिव कायते प्रकाशते इति । गृहालि + कै + कः । ततष्टाप् ।) ज्येष्ठी । इति हारावली । १८४ ॥

गृहावग्रहणी, स्त्री, (गृहमवगृह्यतेऽनया इति । अव + ग्रह + करणे ल्युट् । ततो ङीप् ।) देहली । इत्यमरः । २ । २ । १२ । चातिना दाओया इति च भाषा ॥

गृहाश्रया, स्त्री, (गृहे इव छायायुक्तस्थाने आश्रेते इति । आ + श्रि + अच् । ततः स्त्रियां टाप् ।) ताम्बूली । इति शब्दचन्द्रिका ॥ पानेर गाछ इति भाषा ॥

गृहाश्मा, [न्] पुं, (गृहरक्षितोऽश्मा अश्मनिर्म्मितपेषणशिलाविशेषः ।) पेषणशिला । इति शब्दरत्नावली । शिल इति भाषा ॥

गृहिणी, स्त्री, (गृहस्वामित्वमस्त्यस्याः । इति इनिः ङीप् च ।) भार्य्या । इति हेमचन्द्रः । ३ । १७६ । (यथा, रघौ । ८ । ६७ ।
"गृहिणी सचिवः सखी मिथः
प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम् ॥"
गृहं गृहकार्य्यं साध्यतयाऽस्त्यस्या इति इनिः ङीप् च । गृहकर्म्मकुशला स्त्री । यथा, शाकुन्तलायां चतुर्थाङ्के ।
"शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने भर्त्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः । भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥)

गृही, [न्] पुं, (गृहा दारा विद्यन्तेऽस्य इति इनिः ।) गृहस्थः । इत्यमरः । २ । ७ । ३ ॥ भर्त्ता । इति राजनिर्घण्टः ॥ (यथा भागवते । ३ । ३० । ९ ।
"गृहेषु कूटधर्म्मेषु दुःखतन्त्रेष्वतन्द्रितः ।
कुर्व्वन् दुःखप्रतीकारं सुखवन्मन्यते गृही ॥")